National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 35-36
© 2026 NJHSR
www.sanskritarticle.com

**गुरुप्रसाद श्रीधर हेगडे**
विद्यावारिधिच्छात्रः (Ph.D Scholer),
ज्योतिष-वास्तु विभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**गुरुप्रसाद श्रीधर हेगडे**
विद्यावारिधिच्छात्रः (Ph.D Scholer),
ज्योतिष-वास्तु विभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# विद्यारम्भसंस्कारस्य कालशास्त्रदृष्ट्या मुहूर्तनिरूपणम्॥

**गुरुप्रसाद श्रीधर हेगडे**

**Abstract** –भारतीयानामस्माकं ज्ञानपरम्परा महती उत्कृष्टा विशाला च वर्तते। अस्माकं ज्ञानपरम्परायां नैकविधविद्याक्षेत्राणि विलसन्ति। यां यां विद्यां जनाः अध्येतुमभीप्सवः सन्ति तत्राद्यो सरस्वत्याः अनुग्रहः अपेक्षितो वर्तते। अत एव वाग्देव्याः सरस्वत्याः वरप्रसादप्राप्त्यर्थं करिष्यमाणः संस्कारविशेष एव विद्यारम्भः उत अक्षरारम्भः। अकाले कृतं कर्म निष्फलमेव इति वचनात् यं कमपि कर्म क्रियते तत्र कालः अपेक्ष्यते। अतः संस्कारेऽस्मिन् विहितकालः निश्चितः अस्ति। सकालेनैव शिशुः अनेन संस्कारेण संस्क्रियते तर्हि बहुविधशिक्षां वा ज्ञानं वा सम्यगवगच्छति। अतः अयं तावत् ज्ञानपरम्परायां विशिष्टः विषयः इति निरूप्यते।

**Key words – धर्मः, संस्कारः, कालः, विद्यारम्भः, योगः, मुहूर्तः।**

आत्मशरीरान्यतरनिष्ठो हीनाङ्गपूरको विहितक्रियाजन्य अतिशयविशेष एव संस्कार इति तु श्रुतपूर्वमेव। संस्करणं सम्यक्करणं वा इत्यर्थं प्रकीर्य समुपसर्गात् कृञो घञि प्रत्यये निष्पन्नोऽयं संस्कारशब्दः स्वयमेव स्वलक्षणमपि अभिधत्ते। गर्भाधानादि षोडशप्रकारकाः धर्मोक्ताः संस्काराः सुप्रथिताः। इमे संस्काराः बीजगर्भादिजन्यदोषमार्जकाः इति मनुरमन्यत यथा –

**गार्भैर्होमैर्जातकर्मचूडामौञ्जीनिबन्धनैः।**
**बैजिकं गार्भिकञ्चैनो द्विजानामपमृज्यते॥**[1] इति।

एवं गर्भाधानदिषोडशे संस्कारे विद्यारम्भसंस्कारोऽपि अन्यतमो शिखरायते। तत्र च **सर्वविद्ये त्वमाधारः स्मृतिज्ञानप्रदायिके। प्रसन्ना वरदा भूत्वा देहि विद्यां स्मृतिं यशः ॥** इति सरस्वतीपूजनपुरस्सरं धर्मोक्तविधिना क्रियतेऽयं संस्कारः। साम्प्रतिककाले कृषिक्षेत्रादारभ्य विज्ञानक्षेत्रपर्यन्तं सर्वत्र यत्किमपि कर्म कर्तुं कालं वा दिनं वा उत मुहूर्तं वा पृच्छन्ति जनाः। तथैव श्रौतस्मार्तकर्मसु अपि मुहूर्तं निर्दिदिशुः प्राचीनाः। मुहूर्तं नाम किमित्याशङ्कायां मुहुः त्रायते इति व्युत्पत्तिबलात् यश्च कालविशेषो अस्मान् रक्षति पालयति च सैव मुहूर्तशब्देन प्रलप्यते। मुहूर्तमल्पकाले स्यात् घटिकाद्वितयेऽपि च इत्यतः कालाल्पभागो वा उत घटिकाद्वयं वा मुहूर्तमिति प्राचीनाः प्रोचुः। अयञ्च विद्यारम्भसंस्कारः चतुर्दशविद्यानाम्[2] अर्थसिद्धये अभिधेयप्राप्तये च स्वीये ज्योतिर्विदाभरणे कालिदासेन प्रकटितमस्ति। तत्रादौ विद्यारम्भे कालः विचिन्त्यते रामदीनदैवज्ञेन यथा –

**बृहस्पतिमतं चैव तदभावेऽधुनोच्यते।**
**सौम्यायने प्रदोषादि चिन्तयेद्व्रतबन्धवत्॥**[3]

अत्र च –

**रत्रौ यामद्वयादर्वाक् दृश्यते चेत्त्रयोदशी।**
**सा रात्रिः सर्वकार्यघ्नी शङ्कराराधनं विना**[4]

अर्धरात्रितः प्राक् त्रयोदशी अस्ति चेत् तद्दिवसस्य सन्ध्याकालादारब्धा या रात्रिः सैव प्रदोषकाल इति कथ्यते। स च कालः शङ्कराराधनं विना अन्यत्र गर्हितो वर्तते। एवं विद्यारम्भसंस्कारे उत्तरायणकालः गुरुशुक्रयोरुदयकालः प्रशस्त इति। तथैव अत्र मतान्तरमपि कालिदासः जग्रन्थ यथा –

**कश्चिदुपक्रममाह महर्षिदेवशयनवत्कालमपास्य।**
**विद्यायाः क्षितिसुरविभुवर्षे काव्यगुरूदयकालसमेते॥**[5]

अत आषाढशुद्धैकादशीमारभ्य कार्तिकशुक्लैकादशीं यावद्विष्णु-शयनकाल इति लोकप्रसिद्धः। तद्विष्णुसुप्तकालमपास्य गुरुशुक्रस्य च उदये काले संस्कारोऽयं प्रकर्तव्यः। अपि च विद्यारम्भसमय-सरिणीमित्थं निजगाद श्रीमद्रामदीनदैवज्ञः –

**प्राप्ते तु पञ्चमे वर्षे अप्रसुप्ते जनार्दने।**
**षष्ठीं प्रतिपदं चैव वर्जयित्वा तथाष्टमीम्॥**
**रिक्तां पञ्चदशीं चैव सौरिभौमादिनं तथा।**
**एवं सुनिश्चिते काले विद्यारम्भं तु कारयेत्॥**[6] इति।

एवञ्च विद्गुरुभार्गववासरे अयञ्च संस्कारस्य आरम्भः शुभप्रदः। क्वचिदाचार्याः चन्द्रार्कौ अपि कार्येऽस्मिन् शुभफलदातारौ भवतः इत्यनुमन्यन्ते। एवमेव उत्तरदक्षिणायनसन्धिकालोऽत्र कर्मार्थं निषिध्यते। अपि च मानवानां दिनरात्रिसन्धिकालः संवत्सरसन्धिकालश्च अशुभं जनयति इत्यतः उभयोऽपि प्रतिषेधः। तथैव जन्मनः समवर्षे विद्यायाः आरम्भः अहङ्कारवर्धनाय इति कालिदासः अभिप्रैति। अपि च विद्यारम्भेऽस्मिन् लग्नशुद्धिरपि प्रकर्तव्या इति कालिदासेन अकथ्यत यथा –

**सङ्क्रन्दनसचिवे विदि धिष्ण्ये संहननाय नभो वृषधीस्थे।**
**चञ्चलराश्युदये स तु शस्तोऽथासृजि वांशभुवि त्र्यहितस्थे॥**[7]

अतः संस्कारारम्भलग्नात् लग्नायनभनवमपञ्चमभावेषु बुधगुरुशुक्र-योगः चरलग्नश्च भवेत्कुजशनी तृतीयषड्भावगतौ विद्यारम्भनिमित्तं शस्तः उत्कृष्टतमोऽयञ्च काल इति तु निश्चयः। तथैव ब्रह्मक्षत्रियविट्शूद्रेषु तत्तन्निर्दिष्टासु विद्यासु आरम्भकालः समुज्जुघोष कालिदासः। तत्र च वेदव्याकरणज्ञानार्थं यदि प्रयासः क्रियते तर्हि पूर्वोक्तवासरेषु चरक्षिप्रमृदुसंज्ञकेषु[8] नक्षत्रेषु युक्तेषु कार्यारम्भः शस्तो जायते। अस्मिन्नेव मुहूर्ते धर्मज्ञानमपि करणीयमित्यपि सूचितोऽस्ति। तथैव समस्तशास्त्राध्ययने मुहूर्तोऽयं चिकथयिषति श्रीमद्रा-मदीनदैवज्ञः –

**ध्रुवाणि सर्वशास्त्रेषु सर्वसाधारणान्यपि।**
**मृदूनि सर्वविद्यासु सर्वज्ञानेषु भान्यपि॥**[9]

पूर्वोक्तेषु सर्वेषु शुभमुहूर्तेषु शुभवासरेषु शुभांशकेषु शुभग्रहदृष्टियोगेषु च विद्यारम्भे प्रशस्तो काल इति सङ्गिरन्ते बुधाः। तत्रापि सौम्यवासरे तस्य लग्नहोरायां विद्यारम्भः विशेषेण फलप्रद इति रामदीनदैवज्ञः। यथा –

**प्रोक्ते शुभेषु सर्वेषु शुभवारे शुभांशके।**
**शुभग्रहदृशा युक्ते शुभयुक्ते शुभग्रहे॥**
**विशेषाद्बुधवर्गेषु बुधदृष्टे बुधोदये।**
**बुधवारे च होरायां शंसति ज्ञेप्यनस्तगे॥**[10] इति।

इत्थमत्र भारतीयज्ञानविज्ञानपरम्परायां बहूनि विद्याक्षेत्राणि विराजन्ते। तासां विद्यानामवगमनार्थं यशःप्राप्त्यर्थमाद्यो शुभकालज्ञानमत्यावश्यकम्। सुमुहूर्ते कृतं कर्म सफलं जायते। अकाले कृतमकृतमेव। सकाले कृतं सुष्ठु सफलञ्च जायते। इत्यार्षवचनेन दैवज्ञदत्ते सुमुहूर्ते विद्यारम्भसंस्कारः क्रियते तर्हि क्षेत्रेऽस्मिन् सैव शिशुः यशप्रदः कीर्तिप्रदश्च शोशुभ्यते। एवमस्माकं सनातनज्ञान-परम्परायां ज्योतिर्विज्ञानान्तर्गतं मुहूर्तशास्त्रं विशिष्टं स्थानं वरीवर्ति। तादृशं मुहूर्तज्ञानमवगन्तुं ग्रन्थोऽयं ज्योतिर्विदाभरणं बहूनां बहूपकारको भिद्यते।

**Refference –**


- ❖ मनुस्मृतिः – कर्ता – मनुः, प्रकाशनम् – निर्णयसागरमुद्रणालयः, मुम्बयू।
- ❖ बृहद्दैवज्ञरञ्जनम् – कर्ता – श्रीमद्रामदीनदैवज्ञः, प्रकाशनम् – मोतीलाल बनारसीदास, दिल्ली।
- ❖ ज्यौतिषसोपानम् – प्रकाशनम् – एस्.एम्,एस्.पि. संस्कृत-संशोधनाकेन्द्रम्, उडुपि।
- ❖ ज्योतिर्विदाभरणम् – कर्ता – कालिदासः, प्रकाशनम् – मोतीलाल बनारसीदास, दिल्ली।
- ❖ मुहूर्तचिन्तामणिः – कर्ता – श्रीरामाचार्यः, प्रकाशनम् – मोतीलाल बनारसीदास, दिल्ली।


**पादटिप्पणी -**

[1]मनुस्मृतिः २, २७

[2]अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः।
पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश॥
बृहद्दैवज्ञरञ्जनम् प्रकरणम् ६८, श्लोकः १०

[3]बृहद्दैवज्ञरञ्जनम् प्रकरणम् ६८, श्लोकः ०६

[4]ज्यौतिषसोपानम् – ३

[5]ज्योतिर्विदाभरणम् प्रकरणम् ०९, श्लोकः ०३

[6]बृहद्दैवज्ञरञ्जनम् प्रकरणम् ६८, श्लोकः १२,१३

[7]ज्योतिर्विदाभरणम् प्रकरणम् ०९, श्लोकः ०९

[8]स्वात्यादित्ये श्रुतेस्त्रीणि चन्द्रश्चापि चरं चलम्।
हस्ताश्विपुष्याभिदः क्षिप्रं लघु गुरुस्तथा।
मृगान्त्यचित्रामित्रर्क्षं मृदु मैत्रं बृगुस्तथा।
मुहूर्तचिन्तामणिः नक्षत्रप्रकरणम् ३,६,७

[9]उत्तरात्रयरोहिण्यो भास्करश्च ध्रुवं स्थिरम्।
विशाखाग्नेयभे सौम्यो मिश्रं साधारणं स्मृतम्।
मृगान्त्यचित्रामित्रर्क्षं मृदु मैत्रं बृगुस्तथा।
मुहूर्तचिन्तामणिः नक्षत्रप्रकरणम् २,५,७

[10] बृहद्दैवज्ञरञ्जनम् प्रकरणम् ६८, श्लोकः ४८.४९